उत्तराम्नायो देवेशि तेषामाशु फलप्रदः ॥"

इति समयाचारतन्त्रे २ पटलः ॥*॥

तच्च आम्नायभेदेनाचारभेद उक्तः । यथा,—

"पूर्व्वाम्नायोदितं कर्म्म पाशवं कथितं प्रिये ।
यदुक्तं दक्षिणाम्नाये तदेव पाशवं स्मृतम् ॥
पश्चिमाम्नायजं कर्म्म पशुवीरसमाश्रितम् ।
उत्तराम्नायजं कर्म्म दिव्यवीराश्रितं प्रिये ॥
दिव्योऽपि वीरभावेन साधयेत् पितृकानने ।
वीरासनं विना दिव्यः पूजयेत् पितृकानने ।
ऊर्द्ध्वाम्नायोदितं कर्म्म दिव्यभावाश्रितं प्रिये ॥"

इति निरुत्तरतन्त्रे १ पटलः ॥

षड्‌षणं, क्ली, ( षणामूषणानां समाहारः । ) मिलितषट्कटुद्रव्यम् । यथा,—

"पिप्पली मरिचं शुण्ठी त्रयमेतद्विमिश्रितम् ।
त्रिकटु त्र्यूषणं व्योषं कटुत्रिकमथोच्यते ।
ग्रन्थिकानलचव्यैस्तु चतुःपञ्च षड़ूषणम् ॥"

इति शब्दचन्द्रिका ॥

अपि च ।

"पञ्चकोलं समरिचं षड़ूषणमुदाहृतम् ।
पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहम् ॥"

इति भावप्रकाशः ॥

षड्‌गया, स्त्री, षड्‌विधगया । यथा,—

"गयागजो गयादित्यो गायत्री च गदाधरः ।
गया गयाशिरश्चैव षड्‌गया मुक्तिदायिका ॥"

इति वायुपुराणे गयापद्धतिः ॥

षड्‌गवं, त्रि, (षट् गावो यत्र । समासे अच् ।) गोषट्कयुक्तहलादि । यथा,—

"अष्टागवं धर्म्महलं षड्‌गवं जीविकार्थिनाम् ।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥"

इत्याह्निकाचारतत्त्वम् ॥*॥

प्रत्ययविशेषः । ( स्तु । "प्रकृत्यर्थस्य षट्त्वे षड्‌गवच् ।" ५ । २ । २९ । इत्यस्य वार्त्तिकोक्त्या भवति ॥ ) यथा,—

"प्रयुग्भ्यो गोयुगं युग्मे परं षट्त्वे तु षड्‌गवम् ॥"

इति हेमचन्द्रः ॥

(यथा च महाभारते । ८ । ३८ । ६

"अन्यं तस्मै वरं दद्यां सौवर्णं हस्तिषड्‌गवम् ॥")

षणां गवां समाहारः । इति द्विगुसमासनिष्पन्नम् । तत्र, क्ली ॥

षड्‌ग्रन्था, ( षट् ग्रन्था यस्याः सा । ) वचा । इति भावप्रकाशः ॥ श्वेतवचा । शटी । महाकरञ्जः । इति राजनिर्घण्टः ॥

षड्‌ग्रन्थि, क्ली, (षट् ग्रन्थयो यस्य ) पिप्पलीमूलम् । इति वैद्यकम् ॥ षट्पर्व्वणि, पुं, भूर्ज्जे ॥

षड्‌ग्रन्थिका, स्त्री, (षड्‌ग्रन्था एव । स्वार्थे कन् । टापि अत इत्वम् ।) शटी । इत्यमरः ॥

षड्‌ग्रन्थी, स्त्री, (षट् ग्रन्था यस्याः । ङीष् । ) वचा । इति शब्दरत्नावली ॥

षड्‌जः, पुं, (षड्‌भ्यः स्थानेभ्यः जायते इति । जन + डः । ) तन्त्रीकण्ठोत्थितस्वरविशेषः । इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा,—

"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः ।
षड्‌भ्यः संजायते यस्मात् तस्मात् षड्‌ज इति स्मृतः ॥"

स च मयूरस्वरतुल्यस्वरः । यथा,—

"षड्‌जं रौति मयूरो हि गावो नर्द्दन्ति चार्षभम् ।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम् ॥"

इति भरतः ॥

(अस्मिन् चतस्रः श्रुतयो वसन्ति । यथा, सङ्गीतदर्पणे । ५३ ।

'तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्‌जगाः ॥')

तानसेनमते सप्तस्वराणां मध्ये प्रथमस्वरोऽयम् । खरज् इति लोके ख्यातः । अस्योच्चारणस्थानं कण्ठः । अयं विप्रवर्णः । अस्यार्चिकं नाम । अर्थात् एकस्वरमिलितः । सर्व्वस्वरापेक्षया क्षुद्रस्वरोऽयम् । अस्य ताल एकः । अस्याष्टौ भेदा भवन्ति । इति सङ्गीतशास्त्रम् ॥

षड्‌दुर्गं, क्ली, (षट् प्रकारं दुर्गम् ।) षट्प्रकारकोट्टम् । तद्यथा । धन्वदुर्गम् १ महीदुर्गम् २ गिरिदुर्गम् ३ मनुष्यदुर्गम् ४ मृद्दुर्गम् ५ वनदुर्गञ्च ६ । इति महाभारते राजधर्म्मः ।

षड्‌धा, व्य, (षष् + धाच् ।) षट्प्रकारम् । इति व्याकरणम् ॥

षड्‌बिन्दुः, पुं, विष्णुः । इति त्रिकाण्डशेषः । कीटभेदः । इति मेदिनी । शिरोरोगस्य पक्वतैलविशेषः ; यथा,—

"एरण्डमूलं तगरं शताह्वा
जीवन्तिका सैन्धवराश्निके च ।
भृङ्गं विडङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम् ॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणे भृङ्गरसे विपक्वम् ।
षड्‌बिन्दवो नासिकयोः प्रदेयाः
सर्व्वान्निहन्त्युः शिरसो विकारान् ॥
च्युतांश्च केशान् पलितांश्च दन्तान्
निबद्धमूलान् सुदृढीकरोति
सुपर्णगृध्रप्रतिमञ्च चक्षुः
कुर्य्यात् च बाहूत्तमिकं बलञ्च ॥"

जीवन्तिकात्र इति तक्कीशाकविशेषः । इति भावप्रकाशः ॥

षड्‌भुजः, त्रि, (षट् भुजा यस्य ।) षड्‌हस्तयुक्तः । यथा,—

"भीमस्त्रिपादस्त्रिशिराः षड्‌भुजो नवलोचनः ।
भग्नप्रहरणो रौद्रः कालान्तकयमोपमः ॥"

इति ब्रह्मवैवर्त्तपुराणे माहेश्वरज्वररूपम् ॥

(यथा च महानिर्व्वाणतन्त्रे । ४ । १७ ।

"चतुर्भुजा त्वं द्विभुजा षड्‌भुजाष्टभुजा तथा ।
त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी ॥")

चैतन्यदेवे, पुं । स तु पुरुषोत्तमक्षेत्रे षड्‌भुजो भूत्वा श्रीजगन्नाथदेवशरीरे लीनोऽभूत् । इति लोकप्रसिद्धिः ॥

षड्‌भुजा, स्त्री, (षट् भुजा इव रेखा यस्याम् ।) फललताविशेषः । खरबुजा इति भाषा । (क्वचित् अर्थे क्लीवलिङ्गेऽपि दृश्यते ।) तत्पर्य्यायः । मधुफला २ षड्‌रेखा ३ हस्तकर्कटी ४ तिक्ता ५ तिक्तफला ६ मधुपाका ७ हस्तेर्व्वारुः ८ षण्मुखा ९ । अस्याः फलगुणाः ।

"तिक्तं बाल्ये तदनु मधुरं किञ्चिदम्लञ्च पाके
निष्पक्वञ्चेत् तदमृतसमं तर्पणं पुष्टिदायि ।
हृद्यं दाहश्रमविशमनं मूत्रशुद्धं विधत्ते
पित्तोन्मादापहरकफदं षड्‌भुजं वीर्य्यकारि ॥"

इति राजनिर्घण्टः ॥*॥

चण्डिका । यथा । पूर्व्वदले चण्डिकां पीतवस्त्रां ज्वलद्वह्निप्रभां षड्‌भुजां दक्षिणे गदाभयवज्रधरां वामे शक्तिशूलपरशुधरां देवीमिति ॥*॥ रुद्रचण्डा । यथा । दक्षिणदले रुद्रचण्डां कृष्णवर्णां दिव्याभरणभूषितां प्रसन्नवदनां षड्‌भुजां दक्षिणे वज्रशूलपरशुधरां वामे पाशाङ्कुशवरधरां देवीमिति ॥*॥ चण्डवती । यथा । वायुदले चण्डवतीं धूम्रवर्णां प्रसन्नवदनां सर्व्वालङ्कारभूषितां षड्‌भुजां दक्षिणे अङ्कुशपाशाक्षसूत्रधरां वामे दण्डशूलडमरुधरां देवीमिति ॥ इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥

षड्‌रसः, पुं, ( षट्प्रकारो रसः । ) मधुरादिषट्प्रकाररसः । यथा,—

"मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ।
सन्तीति रसनीयत्वादन्नाद्ये षडमी रसाः ॥"

एषां नामलक्षणे ।

"मधुरं गौल्यमित्याहुरिक्ष्वादौ स च लक्ष्यते ।
लवणस्तु पटुः प्रोक्तः सैन्धवादौ स दृश्यते ॥
तिक्तस्तु पिचुमर्द्दादौ व्यक्तमासाद्यते रसः ।
कषायस्तुवरस्तूक्तः स च पूगीफलादिषु ।
कटुस्तु चारसंज्ञः स्यान्मरीचादौ स चेष्यते ॥"

इति राजनिर्घण्टः ॥

एषां गुणास्तत्तच्छब्दे द्रष्टव्याः ॥

षड्‌रात्रं, क्ली, ( षणां रात्रीणां समाहारः । ) षडहः । यथा,—

सद्यःशौचं भवेद्विप्र तथा चोक्तं चतुर्व्विधम् ।
गर्भस्रावे च वेदोक्तं पूर्व्वं काले त्वचेतसः ॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् ।
षड्‌रात्रञ्चैव वैश्यानां शूद्राणां द्वादशाह्निकम् ॥"

इति वामने १४ अध्यायः ॥

षड्‌रेखा, स्त्री, ( षट् रेखा यत्र । ) षड्‌भुजा । इति राजनिर्घण्टः ॥ षड्‌राजी च ॥

षड्‌लवणं, क्ली, ( षट्‌गुणितं लवणम् ।) सर्ज्जोपेतं पञ्चलवणम् । इति राजनिर्घण्टः ॥

षड्‌वक्त्रः, पुं, (षट् वक्त्राणि यस्य ।) कार्त्तिकेयः । यथा,—

"यतस्ततो विशाखोऽसौ ख्यातो लोकेषु षण्मुखः ।
स्कन्दो विशाखः षड्‌वक्त्रः कार्त्तिकेयश्च विश्रुतः ।"

इति मत्स्यपुराणे १५४ अध्यायः ॥